# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री-3 | प्रश्नपत्रम् – 5 | गुणाः – ५० |
| विषयः – वेदः | सत्रम् – 6 | समयः – १० तः १२ |
| दिनाङ्कः – १७/०७/२०२१ | सन्दर्भग्रन्थः – पारस्करगृह्यसूत्रम् | |

**सूचना -** **निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः सूत्रयोः व्याख्या कार्या।**

१ एष एव विधिर्यत्र क्वचिद्धोमः।
२ अरणिप्रदानमेके।
३ सव्यं पादं प्रक्षाल्य दक्षिणं प्रक्षालयति।
४ निर्मन्थ्यमेके विवाहे।

**प्रश्नः २ षडर्घ्याकर्मविधिं यथाशास्त्रं वर्णयत।**

**प्रश्नः ३ राष्ट्रभृतसंज्ञकमन्त्राणामुल्लेखं कृत्वा विवाहकर्मणि तेषामावश्यकताविषये वर्णयत।**

**प्रश्नः ४ कयोरपि द्वयोः सूत्रयोः व्याख्या कार्या।**

१ एतन्नित्यं सर्वत्र।
२ अथैनामुदीचीं सप्तपदानि प्रक्रामयति।
३ ग्रामवचनं च कुर्युः।
४ स्थालीपाकस्य जुहोति प्रजापतये स्वाहा।

**प्रश्नः ५ जातकर्मसंस्कारविधिं समन्त्रकं वर्णयत।**

**प्रश्नः ६ यथाशास्त्रं चूडाकरणविधिं प्रतिपादयत।**

**प्रश्नः ७ कयोरपि द्वयोः टिप्पणीं लिखत।**

१ स्नातकलक्षणम्।

२ अनध्यायः ।

३ पञ्चमहायज्ञाः ।

४ गर्भाधानसंस्कारः ।

**प्रश्नः ८ यथाशास्त्रम् उपनयनसंस्कारविधिं विवेचयत ।**

**प्रश्नः ९ पारस्करगृह्यसूत्रस्य महत्त्वं वैशिष्ट्यं च प्रतिपादयत ।**

**प्रश्नः १० दशानां प्रश्नानामुत्तरं लिखत ।**

१ पारस्करगृह्यसूत्रे कति कण्डिकाः सन्ति ?

२ सामवेदस्य गृह्यसूत्राणि कानि ?

३ ऋग्वेदस्य गृह्यसूत्रस्य नाम किम् ?

४ ग्रीष्मे कस्य वर्णस्योपनयनं भवति ?

५ ब्राह्मणस्य कृते कस्य वृक्षस्य दण्डो भवति ?

६ 'मातरं प्रथमामेके' इत्यस्य कोऽर्थः ?

७ 'भवति भिक्षां देहि' इत्यस्योच्चारणं कः वर्णः करोति ?

८ सीमन्तोन्नयनस्य कालः कः ?

९ के सन्ति प्राग्जन्मसंस्काराः ?

१० मधुपर्कस्य निर्माणं कथं भवति ?

११ आचार्याय मुख्यतः का दक्षिणा भवति ?

१२ सप्तपदी क्रमे द्वितीयपदे किं प्रार्थयति ?

१३ कति मन्त्राः अभ्यातानसंज्ञकाः भवन्ति ?

१४ कति मन्त्राः राष्ट्रभृत्संज्ञकाः भवन्ति ?

१५ जयासंज्ञकाहुतयः कति भवन्ति ?

****